## छन्दसो निर्मिते । (९३/१६४५)

प्रत्ययार्थ[1]सामर्थ्यलभ्या [2]समर्थविभक्तिः । छन्दःशब्दात् तृतीयासमर्थान् निर्मिते इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । निर्मितः उत्पादितः । छन्दसा [3]निर्मितः छन्दस्यः । छन्दसा इच्छया [4]कृतः इत्यर्थः । इच्छापर्याय छन्दःशब्दः इह गृह्यते[5] ॥

## उरसोऽण् च । (९४/१६४६)

उरःशब्दात् तृतीयासमर्थान् निर्मिते इत्येतस्मिन्नर्थेऽण् प्रत्ययो भवति, चकारात् यत् च । [6]उरसा निर्मितः औरसः पुत्रः, उरस्यः [7]पुत्रः । सञ्ज्ञाधिकारादभिधेयनियमः ॥

## हृदयस्य प्रियः । (९५/१६४७)

निर्देशादेव समर्थविभक्तिः । हृदयशब्दात् षष्ठीसमर्थात् प्रियः इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । हृदयस्य प्रियः हृद्यः देशः । हृद्यं [8]वनम् । सञ्ज्ञाधिकारादभिधेयनियमः । [9]इह न भवति, हृदयस्य प्रियः पुत्रः [10]इति ॥

## बन्धने चर्षौ । (९६/१६४८)

हृदयस्य इत्येव । बन्धने इति [11]प्रत्ययार्थः । तद्विशेषणमृषिग्रहणम् । बध्यते येन तद् बन्धनम् । हृदयशब्दात् षष्ठीसमर्थाद् बन्धने ऋषावभिधेये यत् प्रत्ययो भवति । ऋषिर्वेदो गृह्यते । हृदयस्य [12]बन्धनमृषिः हृद्यः । परहृदयं येन बध्यते वशीक्रियते स वशीकरणमन्त्रो हृद्यः इत्युच्यते ॥

## मतजनहलात् करणजल्पकर्षेषु । (९७/१६४९)

मतादिभ्यः त्रिभ्यः शब्देभ्यः त्रिष्वेव करणादिष्वर्थेषु यथासङ्ख्यं यत् प्रत्ययो भवति । प्रत्ययार्थ[13]सामर्थ्या-ल्लब्धा षष्ठी समर्थविभक्तिः । मतं ज्ञानं [14]तस्य करणं मत्यम् । [15]भावसाधनं वा । जनस्य जल्पः जन्यः । हलस्यः कर्षः हल्यः । द्विहल्यः । [16]त्रिहल्यः । कर्षणं कर्षः, भावसाधनं वा ॥

## तत्र साधुः । (९८/१६५०)

तत्र इति सप्तमीसमर्थात् साधुः इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । [17]सामसु साधुः सामन्यः[18] । [19]वेमन्यः । कर्मण्यः । शरण्यः । साधुः [20]इह प्रवीणो योग्यो वा गृह्यते, नोपकारकः । तत्र हि परत्वात् 'तस्मै हितम्' (५. १. ५/१६६५) इत्यनेन विधिना भवितव्यम् ॥

---

1. सामर्थ्याल्लब्धा ज. 2. तृतीयाविभक्तिः ड. फ. 3. निर्मितं छन्दस्यम् फ, छन्दसा निर्मितः नास्ति इ. 4. कृतं फ. 5. न वेदगायत्र्यादिवचनः इत्यधिकम् ह. 6. उरसा निर्मितः नास्ति ब. ज. 7. पुत्रः नास्ति ब. 8. वचनम् क. इ. फ, धनम् ह. 9. तेन इत्यधिकम् क. ड. 10. इति नास्ति ज. फ. 11. विशेषणार्थः क. 12. बन्धनः हृद्यः ब. क. ड. इ. ई, बन्धनं हृद्यं ह. 13. सामर्थ्यलब्धा क. इ. फ. 14. उत्पादनं ह. 15. भावसाधनं वा ब. ड. ई. ह. 16. परमहल्यः फ. 17. सामनि ड. 18. विप्रः इत्यधिकम् क. 19. नास्ति ब. 20. इति फ.